# सिद्धपदस्थलिङ्गेभ्यः अन्वाख्यानरीतिः

चैतन्यः सु लक्कुण्डी
प्रो. शिवानी वि

भूमिका :

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण।" इत्याह महर्षिः पतञ्जलिः पस्पशाह्निके पाणिनिमुनेः प्राशस्त्यं प्रकटयन्। अष्टाध्यायीग्रन्थद्वारा साधुशब्देभ्यः असाधुशब्दाः पृथक्क्रियन्ते। साधुशब्दनिष्पादनार्थं सूत्राणि क्रमेण सञ्चरन्ति। सूत्रसञ्चारस्य क्रमः प्रक्रियाद्वारा ज्ञायते। सिद्धे नाम निष्पन्ने पदे प्रत्ययस्य कश्चन अंशः एव अवशिष्यते अनुबन्धाद्यंशाः लुप्यन्ते। आदेशागमलोपविधानात् प्रत्ययेषु विकाराः अपि जायन्ते। गोचरान् अंशानेव आधृत्य पदान्वाख्यानं कथं साध्यमिति अस्य शोधपत्रस्य विषयः। कियत् पर्यन्तं प्रत्ययाः अनुमातुं शक्या इत्यपि विचार्यते।

Keywords: लिङ्गम्, चिह्नम्, प्रत्ययः, अनुमानम्, अन्वाख्यानम्, प्रक्रिया

मूलम् :

पञ्चभिः वृत्तिभिः समन्वितायां अष्टाध्याय्यां बहुधा प्रत्ययाः उपदिष्टाः। प्रत्याय्यते अर्थः अनेन इति प्रत्ययः। अर्थं संप्रत्याययति स प्रत्ययः इत्येवं महाभाष्ये प्रस्तुतम्। प्रत्येति पश्चादागच्छति इति प्रत्ययः परः इत्यपि प्रत्ययस्य लक्षणम्। प्रत्ययेषु सुप्- तिङ्- कृत्- स्त्री- विकरण- तद्धित- सनादयः गणनीयाः। सुबादयः एकविंशतिः, तिङादयः परस्मैपद- आत्मनेपदभेदेन अष्टादश, त्रिशताधिकाः कृतः, दश स्त्रीप्रत्ययाः, दश विकरणाः, द्विशताधिकाः तद्धिताः बहुष्वर्थेषु, द्वादश सनादयश्च। एतेषु पुनः तिङ्- कृत्- विकरण- सनादयः सामान्यतया धातुभ्यः, अन्ये च प्रातिपदिकेभ्यः विहिताः। स्त्रीत्वविवक्षायां च स्त्रीप्रत्ययाः विधीयन्ते। तृतीयाध्यायात् आपञ्चमाध्यायपरिसमाप्तेः एते प्रत्ययाः विहिताः। अन्ये च औणादिकाः उणादयो बहुलमिति सूत्रेण परिग्रहीताः। पदनिष्पत्तिप्रक्रियायां प्रत्ययाः शब्दस्वरूपं निर्णीय कारकाद्यर्थान् द्योतयन्ति। केचन वाचकाः केचन द्योतकाश्च भवन्ति। प्रकृत्यर्थमेव

बोधयन्ति चेत् द्योतकाः। स्वार्थं बोधयन्ति चेत् वाचकाः। वाचकत्वं द्योतकत्वं च प्रत्ययानां सन्दर्भायत्तम्।

प्रत्ययाः सामान्यतया इत्-वर्णैः अनुबद्धाः भवन्ति। यथा घञ्, ण्वुल्, णिच्, तिप् इत्यादिषु ञणपादयः इत्-संज्ञकवर्णाः। अनुबन्धलोपोत्तरं प्रत्ययस्य कश्चन मूलांशः अवशिष्यते। तं निरनुबद्धं मूलांशम् आधृत्य सारूप्यनिर्णयः क्रियते वाऽसरूपादिविधिषु। तद्यथा- अण् णः घञ् इत्यादिषु अ इत्यवशिष्यते मूलांशः। टाप् डाप् चाप् इत्यादिषु आ इति मूलांशः। अवधेयं यत् यद्यपि मूलांशः समानः स्यात् प्रत्ययाधिकारमाश्रित्य विभिन्नकार्याणि भवितुमर्हन्ति। यथा अणः तद्धितकार्याणि प्राप्नुवन्ति तद्धिताधिकारे पठितत्वात्। घञ्-प्रत्ययः कृत्-कार्याणि लभते तत्रोक्तत्वात्।

अस्मिन् लेखे इत ऊर्ध्वं पदस्य केषां धर्माणाम् अनुमानं शक्यमिति सङ्क्षेपेण उच्यते। विस्तरेण केषाञ्चन पदानां चर्चा लेखस्य अन्ते उपनिबद्धा।

क) प्रत्ययावशेषान् दृष्ट्वा मूलप्रत्ययस्य अनुमानम्

सोपानक्रमेण पदनिष्पत्तौ विविधाः आकाङ्क्षाः उद्भवन्ति। तत्र सामान्यतया लिङ्ग-विभक्ति-वचनादिकं सुबन्तेषु, अपिच लकार-पुरुष-वचनानि तिङन्तेषु। प्रत्ययप्रकारं दृष्ट्वा प्रक्रिया प्रवर्तते अन्तिमं पदं च निष्पद्यते। निष्पन्नपदे प्रक्रियायाः ज्ञानं साररूपेण उपलभ्यते न तु विस्तरेण। तथाहि प्रत्ययानामपि विकृतमेव स्वरूपं प्रतिभाति। अन्तिमपदे विद्यमानैः विभिन्नैः चिह्नैः लिङ्गवचनादिधर्मज्ञानं, फलतः पदार्थज्ञानं च प्राप्यते। सन्दर्भोऽपि पदार्थनिश्चये उपकरोति। यथा- रामः इत्यत्र रम् धातुः। धातौ वृद्धिविकारः। अन्ते अः इति प्रत्ययांशः। तत्रापि घञ्-प्रत्ययस्य अकारः, सुपः विसर्गश्च। अस्मिन्नुदाहरणे वृद्ध्यक्षरं दृष्ट्वा, प्रत्यये ञित्त्वमुत णित्त्वम् अनुमातुं शक्यते (अचो ञ्णिति इति सूत्रस्मरणात्)।

ख) प्रत्ययावशेषान् दृष्ट्वा लिङ्गस्य अनुमानम्

लिङ्गादिव्यवस्था यद्यपि विवक्षाद्वारा क्रियते, तथापि तस्य परिणामः साक्षात् अन्तिमपदे दृश्यत एव। यथा- वृक्षः इत्यत्र प्रथमाविभक्तौ एकवचनरूपे विसर्गचिह्नेन पुंलिङ्गविवक्षा ज्ञायते। फलमित्यत्र अम् इति प्रत्ययांशेन नपुंसकलिङ्गत्वं ज्ञाप्यते अतोऽम् इति सूत्रबलात्। लिङ्गव्यवस्थापनार्थं पाणिनिना लिङ्गानुशासनम् उपदिष्टमस्ति। तत्रत्यैः सूत्रैः लिङ्गज्ञानं सामान्यतया प्राप्यते। परन्तु सम्पूर्णज्ञानार्थं

कोषाः प्रमाणम्। उदा- "षोपधः" इति सूत्रं पुंलिङ्गाधिकारे उपदिष्टम्। तेन वृषः वृक्षः इत्यादिशब्दाः पुंलिङ्गाः इति ज्ञायते। तदग्रिमं सूत्रमस्ति "शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके"। इदं पूर्वतनसूत्रस्य अपवादभूतम्। अनेन पीयूषपदं नपुंसकलिङ्गमिति ज्ञायते। तथैव "क्तिन्नन्तः" इति सूत्रं स्त्र्यधिकारे पठितम्। तेन कृतिः गतिः इत्यादयः स्त्रीलिङ्गकाः इति ज्ञायते। एवं रीत्या "मिन्यतः" इत्यपि स्त्रधिकारे पठितम्। सूत्रार्थः- मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। यथा भूमिः ग्लानिः। तदग्रे "वह्निवृष्णवग्नयः पुंसि" इति अपवादसूत्रमपि पठितम्। एवं प्रकारेण लिङ्गानुशासनस्य पठनेन लिङ्गज्ञानं सम्पादयितुं शक्यम्। कृत्सु तावत् स्पष्टं लिङ्गं दृश्यते। यथा ल्युट् प्रत्ययान्ताः शब्दाः नपुंसकलिङ्गकाः भवन्ति "ल्युट् च" इति सूत्रप्रामाण्यात्। यथा- पठनम्, जल्पनम्, धावनम्। क्रियासामान्ये द्योतितव्ये नपुंसकलिङ्गः शब्दः भवति क्तप्रत्यययोजनेन। यथा- हसितम्, जल्पितम्। अत्र "नपुंसके भावे क्तः" इति सूत्रं प्रमाणम्।

समासेषु लिङ्गव्यवस्था विस्तृता अस्ति। अव्ययीभावसमासश्चेत् सामान्यतया नपुंसकलिङ्गः शब्दः निष्पद्यते। द्वन्द्वश्चेत् उत्तरपदस्य लिङ्गं स्वीक्रियते। बहुव्रीहिश्चेत् द्योतितपदार्थमाश्रित्य लिङ्गव्यवस्था परिकल्प्यते। भिन्नार्थकपदेषु लिङ्गानुगुणम् अर्थनिर्णयः क्रियते। तत्र यद्यपि प्रत्ययः समानः लिङ्गविवक्षा तु भिन्ना। अथ च, एकं पदं दृष्ट्वा अनेके अंशाः अनुमातुं शक्याः। तेषां ज्ञानेन अज्ञातपदानां अवगमने सारल्यं भवति। यद्यत्र पुंलिङ्गविवक्षा नाभविष्यत् तर्हि रामम् इत्यपि प्रथमायां रूपम् असेत्स्यत्। तमालपत्रे रामशब्दः नपुंसकमिति विविधकोषदर्शनेन ज्ञायते। स्त्रीलिङ्गविवक्षायां रामा इत्यपि रूपम् सेत्स्यति। अतः लिङ्गज्ञाने भवितव्ये विवक्षा का इति ज्ञातव्या। आपः इत्येतस्मिन् पदे यद्यपि अः इति अन्ते श्रूयते तथापि अस्य स्त्रीलिङ्गं बहुवचनं च। अनेन उदाहरणेन ज्ञायते यदेकस्य चिह्नस्य बहवो विकल्पाः भवन्ति। अस्मिन् सन्दर्भे केवलं सिद्धपदस्थचिह्नं दृष्ट्वा लिङ्गमनुमातुम् अशक्यम्। लिङ्गानुशासनं कोशाः वा शरणम्।

ग) प्रत्ययावशेषान् दृष्ट्वा लकारस्य अनुमानम्

तिङन्तेषु तावत् प्रत्येकं लकारस्य किञ्चित् स्वरूपं भवति। तदेव स्वरूपं अन्तिमपदे प्रतिबिम्बितं भवति। यथा अभूत् इत्यत्र आदौ अकारः, गुणनिषेधः, प्रत्ययस्थ-

इकारलोपश्च। इदं सर्वं सूत्राणि अवगम्य साक्षात् ज्ञातुं शक्यते। परन्तु यः सूत्राणि अनवगत्य लकारमनुमातुम् इच्छति तेन लकारप्रत्ययानाम् अवशेषाः स्मर्तव्याः। तेन वा लकारस्य ज्ञानं सम्भवति। अस्य दीर्घा चर्चा अस्मिन् लेखे अग्रे कृता।

घ) प्रत्ययावशेषान् दृष्ट्वा तद्धितप्रत्ययस्य अनुमानम्

तद्धितेषु एकमेव रूपं भवति चेदपि निष्पत्तिक्रमम् अनुसृत्य अर्थनिर्णयः भवति। यथा माथुरः इत्यस्य "तत्र जातः" इति सूत्रेण "मथुराया जात" इत्यर्थ, "तत्र भवः" इत्यनेन "मथुरायां भवः" इति, "भक्तिः" इत्यनेन "मथुरा भक्तिः अस्य" इति। एवं रीत्या एकेनैव शब्दरूपेण बहुविधः अर्थः उपपन्नः।

धात्वादिव्याकरणांशान् अजानन् बालः रामशब्दे केवलं राम इत्याकृतिं परिलक्षयति तदनु विभक्तिं पृथक्त्वेन अवगच्छति। तत्र वृद्धव्यवहारेण सर्वा अपि विभक्तीः सः जानीते। अतः तेषु विद्यमानं समानां रामाकृतिं प्रातिपदिकत्वेन जानाति। धातुज्ञानं तु धातुपाठस्मरणेन विना अशक्यम्। परन्तु प्रकृतिविकाराः ज्ञायन्ते चेत् तस्य कारणमपि अनुमातुं शक्यम्।

इदानीं तिङन्तपदव्यवस्थां विचारयाम। व्याकरणदृष्ट्या प्रत्येकं लकारेषु भिन्नाः प्रत्ययाः विहिताः। धातूनां परस्मैपदात्मनेपदविभागश्च परिकल्पितः। सेट्-त्वं अनिट्-त्वं च परिकल्पितम्। यदि प्रत्ययः सेट् धातुरपि सेट् तर्हि इडागमः भवितुमर्हति। एतन्मनसि निधाय व्याकरणज्ञः शब्दान् प्रयुङ्क्ते।

प्रत्ययावशेषान् दृष्ट्वा लकारस्य अनुमानम् - विस्तरेण -

व्याकरणशास्त्रस्य विशिष्टज्ञानं विना प्रयोक्तुः दृष्ट्या यदि पश्याम तर्हि क्रियापदानां कालविभागः तत्सम्बन्धीनि चिह्नानि च प्रद्योतितानि। यथा "भवति" इति पदापेक्षया भविष्यति इत्यत्र "इष्य" इत्यंशः मध्ये दृश्यते। तथैव पठति पठिष्यति इत्यनयोर्मध्येऽपि। अपठत् अभवत् अगच्छत् इत्यादिषु अकारः आदौ श्रूयते। अन्ते च ति इति स्थाने त् इत्येव श्रूयते। एवं अजीजनत् इत्यत्रापि आदौ अकारः अन्ते त् इति निविष्टमस्ति। परन्तु व्याकरणदृष्ट्या उभयोः लकारः भिन्नः। अपठत् इत्यादिषु लङ्। अजीजनत् इत्यत्र लुङ्। तस्य असकृत् दर्शनेन ज्ञायते यत् अजीजनत् इत्यत्र द्विवारं जकारस्य उच्चारणं कृतमस्ति।

वस्तुतः अजीजनत् इत्यत्र धातोः द्वित्त्वं जातमस्ति। सामान्यतया सन्नन्तधातुः अथवा यङन्तधातुः अस्ति चेत् कस्मिंश्चिदपि लकारे द्वित्त्वं शक्यम्। अत्र जनीँ प्रादुर्भावे इत्यस्य धातोः णिचि लुङि च कृते चङिति प्रत्ययः संयुज्यते। "सन्वल्लघुनि चङ्परेऽनग्लोपे" इत्यनेन सन्-वत् द्वित्त्वम् अत्रापि जायते चङ्-परे। सूक्ष्मज्ञानं तावत् सूत्राणि अवलोक्य सम्भवति। परन्तु चिह्नानि दृष्ट्वा किञ्चित् ऊहितुं शक्यते।

आदौ विद्यमानम् अकारं दृष्ट्वा लुङ्-लङ्-लृङ्-लकाराणामेव सम्भावना। तत्रादौ जन् धातोः श्रुतपूर्वाणि सामान्यरूपाणि इत्थम्- जायते, अजायत इत्यादीनि। एतेषु आत्मनेपदप्रत्ययौ "ते", "त" इत्येतौ दृश्येते। अतः धातुः आत्मनेपदी इति जानीमः। पुनः जन् इति स्थाने जा इति श्रूयते। ज्ञाजनोर्जा इति सूत्रस्मरणेन ज्ञायते यत् शित्-प्रत्यये परे जा इत्यादेशः भवेत्। अतः अनुमातुं शक्यते यत् अजीजनत् इत्यत्र शित्-प्रत्ययः धातोः परे नास्ति। अजीजनत् इत्यत्र अन्ते श्रूयमाणः तकारः परस्मैपदित्वं सूचयति। आत्मनेपदी धातुः अस्ति इति कारणेन णिचः (अशित्) विधानेनैव परस्मैपदित्वं सिद्ध्यति। सकृत् दर्शनेन स्य (ष्य) इत्यस्य अभावः दृश्यते। तेन लृङ् नास्तीति निश्चितम्। लङ्-लुङोः द्वित्त्वं कुत्र सम्भवतीति द्रष्टव्यम्।

लुङ्लकारे तावत् "च्लि लुङि" "च्लेः सिच्" इति सूत्रद्वयं प्रवर्तते। आत्मनेपदि रूपमस्ति चेत् (सिचः) सकारः षकारो वा अन्तिमपदे श्रूयत एव। परस्मैपदेषु गातिस्थाघुपाभूभ्यः सिचः लोपः विहितः। परन्तु जन्-धातुः तेषु नान्तर्भवति। अवधेयं यत् णिचि च्लेः चङादेशः (णिश्रिद्रुस्रुभ्यः कर्तरि चङ्) भवतीत्यतः सि (षि) श्रवणं बाधितम्। चङादेशे कृते "सन्वल्लघुनि चङ्परेऽनग्लोपे" इत्यनेन द्वित्वं सम्भवति। अतः द्वित्वविधानं दृष्ट्वा "लुङ्-लकारस्य रूपं स्यात्" इति ऊहितुं शक्यते। त् इति प्रथमपुरुषैकवचनस्य अवशेषः इति मत्वा अजीजनत् इति लुङ्-लकारस्य प्रथमपुरुषैकवचनस्य परस्मैपदि रूपमिति ज्ञायते।

अधिगीष्महि

महिङ् इति तिङ्-प्रत्ययः साक्षादेव आत्मनेपदित्वं द्योतयति। अधि-उपसर्गोऽपि स्पष्टः। गीष् इत्यंशः एव विचारणीयः। तत्र धातोः आदेशाः ज्ञातव्या भवन्ति। इणो गा

लुङि इत्यनेन इण्-धातोः गा-आदेशः भवति लुङि परतः। अगात् इत्युदाहरणम्। अतः इण्-धातोः इदं रूपं स्यादिति चिन्त्यते। परन्तु इतोऽपि सूक्ष्मतया परिशील्यते चेत् अध्ययनार्थकस्य इङ्-धातोः अपि गमिरादेशो विहितः सनि परे। अपि च विभाषा लुङ्लृङोः इत्यनेन लुङि लृङि च परतः इङः विकल्पेन गाङादेशो भवति। तथा च अयं धातुः नित्यं अधि-उपसर्गपूर्वकमेव प्रयुज्यते। अतः अधि-उपसर्गमेव आश्रित्य इङ्-धातोः अनुमानम्। लुङ्-लृङोः अडागमः नित्यः माङि असति। अस्य पदस्य प्रयोगमाश्रित्यैव माङ्-योगः द्रष्टव्यः। अध्यगीष्महि इति पदम्। मा अधिगीष्महीति भाष्यप्रयोगः। न माङ् योगे इति सूत्रात् तत्र अडागमः निषिध्यते। अन्यसूत्रेण ईत्वमपि विधीयते इत्यलं विस्तरेण। अधि-उपसर्गपूर्वकस्य इङ् अध्ययने धातोः, उत्तमपुरुषस्य बहुवचनरूपमिदम्।

## <u>उपसंहारः</u>

निष्पन्नात् पदात् पूर्वानुमानपद्धतिः विचारिता। प्रत्ययविकाराः अस्मिन् अन्वाख्यानप्रयासे उपकुर्वन्ति। धातोः आदेशाश्च ज्ञातव्याः। सति लिङ्गबाहुल्ये, अनुमानं सुकरम्। सूत्राणि सर्वथा प्रामाण्यं भजन्ते। अतः तेषाम् आलम्बनम् अनिवार्यम्। परन्तु व्याकरणं प्रविविक्षुः जनः ईदृशं विश्लेषणं कृत्वा सूत्रज्ञानं दृढीकर्तुं प्रभवति।

## सन्दर्भाः-


1. अयं लेखः मम विद्यावारिधेः विषयेण (पाणिन्युपज्ञस्य प्रक्रियाविज्ञानस्य साङ्गणिकं विश्लेषणम् इत्यनेन) सह सम्बद्धः ।
2. लिङ्गानुशासने पुंलिङ्गाधिकारे ९३
3. लिङ्गानुशासने पुंलिङ्गाधिकारे ९४
4. लिङ्गानुशासने स्त्र्यधिकारे ९
5. लिङ्गानुशासने स्त्र्यधिकारे ६
6. लिङ्गानुशासने स्त्र्यधिकारे ७
7. अष्टाध्यायी ३.३.११५
8. अष्टाध्यायी ३.३.११४

9. अष्टाध्यायी ४.३.२५
10. अष्टाध्यायी ४.३.५३
11. अष्टाध्यायी ४.३.९५
12. अष्टाध्यायी ७.४.९३
13. अष्टाध्यायी ६.४.७१ (लुङ्लङ्लृङ्क्ष्वडुदात्तः)
14. अष्टाध्यायी ३.१.४३
15. अष्टाध्यायी ३.१.४४
16. अष्टाध्यायी ७.४.९३
17. तस्मात् अनर्थकम् मा अधिगीष्महि इति अध्येयम् व्याकरणम् - पस्पशाह्निके
18. अष्टाध्यायी ६.४.६६ (घुमास्थागापाजहातिसां हलि)

## सन्दर्भग्रन्थाः

१. पाणिनीया अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७

२. भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी बालमनोरमा-सहिता, श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२

३. वामनजयादित्ययोः काशिकावृत्तिः, प. ईश्वरचन्द्रः, चौखम्बाप्रकाशनम्, २०१०

३. पाणिनीयं लिङ्गानुशासनम्, डा. नरेश झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००२

४. म.म दीक्षिता-पुष्पायाः इडागमः, प्रकाशकसंस्था संस्कृतभारती, २०१

❋ ❋ ❋